শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে

# ॥ অষ্টপঞ্চাশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ অষ্টপঞ্চাশঃ সর্গঃ ॥

## গুরুপুত্রৈর্নির্ভর্ত্স্য তস্মৈ গৃহং গন্তুমাজ্ঞাপ্রদানমন্যং গুরুং ৱরীতুমুদ্যতায রাজ্ঞে শাপদানং চ, তেষাং শাপেন চাণ্ডালৎৱং গতস্য ত্রিশঙ্কোর্ৱিশ্ৱামিত্রমাশ্রযিতুং ততো গমনম্

ততস্ত্রিশঙ্কোর্ৱচনং শ্রুৎৱা ক্রোধসমন্ৱিতম্।
ঋষিপুত্রশতং রাম রাজানমিদমব্রৱীৎ॥ **1.58.1** ॥

প্রত্যাখ্যাতোঽসি দুর্মেধো গুরুণা সত্যৱাদিনা।
তং কথং সমতিক্রম্য শাখান্তরমুপেযিৱান্॥ **1.58.2** ॥

ইক্ষ্ৱাকূণাং হি সর্ৱেষাং পুরোধাঃ পরমা গতিঃ।
ন চাতিক্রমিতুং শক্যং ৱচনং সত্যৱাদিনঃ॥ **1.58.3** ॥

অশক্যমিতি সোৱাচ ৱসিষ্ঠো ভগৱানৃষিঃ।
তং ৱযং ৱৈ সমাহর্তুং ক্রতুং শক্তাঃ কথঞ্চন॥ **1.58.4** ॥

বালিশস্ত্ৱং নরশ্রেষ্ঠ গম্যতাং স্ৱপুরং পুনঃ।
যাজনে ভগৱাঞ্শক্তস্ত্রৈলোক্যস্যাপি পার্থিৱ॥ **1.58.5** ॥

অৱমানং কথং কর্তুং তস্য শক্ষ্যামহে ৱযম্।
তেষাং তদ্ ৱচনং শ্রুৎৱা ক্রোধপর্যাকুলাক্ষরম্॥ **1.58.6** ॥

স রাজা পুনরেৱৈতানিদং ৱচনমব্রৱীৎ।
প্রত্যাখ্যাতো ভগৱতা গুরুপুত্রৈস্তথৈৱ হি॥ **1.58.7** ॥

অন্যাং গতিং গমিষ্যামি স্বস্তি ৱোঽস্তু তপোধনাঃ।
ঋষিপুত্রাস্তু তচ্ছ্রুৎৱা ৱাক্যং ঘোরাভিসংহিতম্॥ **1.58.8** ॥

শেপুঃ পরমসঙ্ক্রুদ্ধাশ্চণ্ডালৎৱং গমিষ্যসি।
ইত্যুকত্বা তে মহাত্মানো ৱিৱিশুঃ স্বং স্বমাশ্রমম্॥ **1.58.9** ॥

অথ রাত্র্যাং ৱ্যতীতাযাং রাজা চণ্ডালতাং গতঃ।
নীলৱস্ত্রধরো নীলঃ পুরুষো ধ্ৱস্তমূর্ধজঃ॥ **1.58.10** ॥

চিত্যমাল্যাঙ্গরাগশ্চ আযসাভরণোঽভৱৎ।
তং দৃষ্টৱা মন্ত্রিণঃ সর্ৱে ত্যজ্য চণ্ডালরূপিণম্॥ **1.58.11** ॥

প্রাদ্রৱন্ সহিতা রাম পৌরা যেঽস্যানুগামিনঃ।
একো হি রাজা কাকুৎস্থ জগাম পরমাত্মৱান্॥ **1.58.12** ॥

দহ্যমানো দিৱারাত্রং ৱিশ্ৱামিত্রং তপোধনম্।
ৱিশ্ৱামিত্রস্তু তং দৃষ্টৱা রাজানং ৱিফলীকৃতম্॥ **1.58.13** ॥

চণ্ডালরূপিণং রাম মুনিঃ কারুণ্যমাগতঃ।
কারুণ্যাৎ স মহাতেজা ৱাক্যং পরমধার্মিকঃ॥ **1.58.14** ॥

ইদং জগাদ ভদ্রং তে রাজানং ঘোরদর্শনম্।
কিমাগমনকার্যং তে রাজপুত্র মহাবল॥ **1.58.15** ॥

অযোধ্যাধিপতে ৱীর শাপাচ্চণ্ডালতাং গতঃ।
অথ তদ্বাক্যমাকর্ণ্য রাজা চণ্ডালতাং গতঃ॥ **1.58.16** ॥

অব্রৱীৎ প্রাঞ্জলির্ৱাক্যং ৱাক্যজ্ঞো ৱাক্যকোৱিদম্।
প্রত্যাখ্যাতোঽস্মি গুরুণা গুরুপুত্রৈস্তথৈৱ চ॥ **1.58.17** ॥

অনৱাপ্যৈৱ তং কামং মযা প্রাপ্তো ৱিপর্যযঃ।
সশরীরো দিৱং যাযামিতি মে সৌম্যদর্শন॥ **1.58.18** ॥

মযা চেষ্টং ক্রতুশতং তচ্চ নাৱাপ্যতে ফলম্।
অনৃতং নোক্তপূর্ৱং মে ন চ ৱক্ষ্যে কদাচন॥ **1.58.19**॥

কৃচ্ছ্রেষ্ৱপি গতঃ সৌম্য ক্ষত্রধর্মেণ তে শপে।
যজ্ঞৈর্বহুৱিধৈরিষ্টং প্রজা ধর্মেণ পালিতাঃ॥ **1.58.20**॥

গুরৱশ্চ মহাত্মানঃ শীলৱৃত্তেন তোষিতাঃ।
ধর্মে প্রযতমানস্য যজ্ঞং চাহর্তুমিচ্ছতঃ॥ **1.58.21**॥

পরিতোষং ন গচ্ছন্তি গুরৱো মুনিপুঙ্গৱ।
দৈৱমেৱ পরং মন্যে পৌরুষং তু নিরর্থকম্॥ **1.58.22**॥

দৈৱেনাক্রম্যতে সর্ৱং দৈৱং হি পরমা গতিঃ।
তস্য মে পরমার্তস্য প্রসাদমভিকাঙ্ক্ষতঃ।
কর্তুমর্হসি ভদ্রং তে দৈৱোপহতকর্মণঃ॥ **1.58.23**॥

নান্যাং গতিং গমিষ্যামি নান্যচ্ছরণমস্তি মে।
দৈৱং পুরুষকারেণ নিৱর্তযিতুমর্হসি॥ **1.58.24**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে বালকাণ্ডে অষ্টপঞ্চাশঃ সর্গঃ ॥